Jai Randal Maa

મુદા કરાત્ત મોદકં સદા વિમુક્તિ સાધકમ |
કળાધરાવતંસકં વિલાસિલોક રક્ષકમ |
અનાયકૈક નાયકં વિનાશિતેભ દૈત્યકમ |
નતાશુભાશુ નાશકં નમામિ તં વિનાયકમ || 1 ||

નતેતરાતિ ભીકરં નવોદિતાર્ક ભાસ્વરમ |
નમત્સુરારિ નિર્જરં નતાધિકાપદુદ્ઢરમ |
સુરેશ્વરં નિધીશ્વરં ગજેશ્વરં ગણેશ્વરમ |
મહેશ્વરં તમાશ્રયે પરાત્પરં નિરન્તરમ || 2 ||

સમસ્ત લોક શઙ્કરં નિરસ્ત દૈત્ય કુઞ્જરમ |
દરેતરોદરં વરં વરેભ વક્ત્રમક્ષરમ |
કૃપાકરં ક્ષમાકરં મુદાકરં યશસ્કરમ |
મનસ્કરં નમસ્કૃતાં નમસ્કરોમિ ભાસ્વરમ || 3 ||

અકિઞ્ચનાર્તિ માર્જનં ચિરન્તનોક્તિ ભાજનમ |
પુરારિ પૂર્વ નન્દનં સુરારિ ગર્વ ચર્વણમ |
પ્રપઞ્ચ નાશ ભીષણં ધનઞ્જયાદિ ભૂષણમ |
કપોલ દાનવારણં ભજે પુરાણ વારણમ || 4 ||

નિતાન્ત કાન્તિ દન્ત કાન્તિ મન્ત કાન્તિ કાત્મજમ |
અચિન્ત્ય રૂપમન્ત હીન મન્તરાય કૃન્તનમ |
હૃદન્તરે નિરન્તરં વસન્તમેવ યોગિનામ |
તમેકદન્તમેવ તં વિચિન્તયામિ સન્તતમ || 5 ||

મહાગણેશ પઞ્ચરત્નમાદરેણ યોઽન્વહમ |
પ્રજલ્પતિ પ્રભાતકે હૃદિ સ્મરન ગણેશ્વરમ |
અરોગતામદોષતાં સુસાહિતીં સુપુત્રતામ |
સમાહિતાયુ રષ્ટભૂતિ મભ્યુપૈતિ સોઽચિરાત ||

www.randalmaa.com